शीर्ष पृष्ठ →

# मेघदूतम्

भगवत्याः कालीदेव्याः कृपया जगद्विख्यातो महाकविः कालिदासः समपद्यत। जनश्रुतिरियमतीव प्रसिद्धाऽस्ति। श्रीलङ्कावासिष्वपि कालिदास विषये एका जनश्रुतिरतीव प्रसिद्धाऽस्ति। श्रूयते यत् कालिदासेन सिंघलद्वीपस्य राजकुमारदासो महाकविं कालिदासं सिंघलद्वीपे आहूतवान्। राज्ञः कुमारदासस्य 'जानकीहरण' महाकाव्यस्याऽतीव प्रशंसा विहिता। कालिदासस्तत्र गतः, राज्ञः कुमारदासस्य चाऽनन्यप्रियजनः संवृत्तः। श्रूयते यत सिंघलद्वीपे एकस्याः गणिकायाः द्वारे श्लोकार्धमिदं लिखितमासीत् —

'कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते।'

यदा महाकविः कालिदासः श्लोकार्धमिदं दृष्टवान्, तदा तेन तस्य श्लोकार्धस्य पूर्तिश्चोल्लिखितरूपेण विहिता —

'बाले! तव मुखाम्भोजे कथमिन्दीवरद्वयम्॥'

Renu Devi
26/04/21

राधा कृष्णाकान्त संस्कृत महाविद्यालय सुखसेना, पूर्णिया।

उपशास्त्री-द्वितीय खण्ड साहित्यम् तृतीय पत्रम्

रघुवंश महाकाव्यम्
द्वितीयः सर्गः

प्र०-(1) पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥

उत्तरम्-प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दिलीपः दिवारात्रिमध्ये सन्ध्या इव नन्दिन्याः वर्णनं करोति ।

वशिष्ठाश्रमस्य समीपे पृष्ठे राजा दिलीपः, मध्ये नन्दिनी पुनरग्रे सुदक्षिणा इति क्रमः आसीत् । तदानीं दम्पत्योर्मध्ये स्थिता नन्दिनी दिनरात्र्योः मध्यस्थिता सन्ध्यावत् शुशुभे । अत्र प्रतापिनो राज्ञो दिलीपस्य दिनसादृश्यात् चन्द्रमुखायाश्च सुदक्षिणायाः चन्द्रयुतनिशासादृश्यात् पाटलवर्णाया नन्दिन्या दिनक्षपामध्यगतसन्ध्यासाम्यमाविष्कृतमस्ति ।

व्याख्याः- वर्त्मनि = मार्गे, पार्थिवेन = राजा दिलीपेन, पुरस्कृता = अग्रे कृता, किञ्च पार्थिवधर्मपत्न्या = राजमहिष्या सुदक्षिण्या, प्रत्युद्गता = अभियाता, सा धेनुः = नन्दिनी, तदन्तरे = सुदक्षिणा दिलीपयोर्मध्यगता सती, दिनक्षपामध्यगता = दिवसनिशामध्यवर्तिनी, सन्ध्या = सायंकाल, इव = यथा, विरराज = शुशुभे ।

Renu Devi
26/04/21

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

शास्त्री प्रतिष्ठा - III खण्ड (साहित्य)

# मेघदूतम्

प्र० - (1) ग्रन्थकर्तुर्महाकवेः कालिदासस्य जीवनवृत्तं स्वसंस्कृतगिरा प्रकाशनीयम्।

उत्तरम् → कालिदासविषये जनश्रुतिरियं प्रसिद्धाऽस्ति यद् बाल्यकाले कालिदासोऽतीव मूर्खं आसीत्। राज्ञः शारदानन्दस्य 'विद्योत्तमा' नाम्नी पुत्री विदुषी परमसुन्दरी चाऽऽसीत्। साऽतीवाऽभिमानिनी आसीत्। अतएव तयेयमुद्घोषणा विहिता यत् यस्तां शास्त्रार्थे जेष्यति तेनैव सहास्या विवाहं करिष्यतीति। अतएव विद्योत्तमा नाम्न्या विदुष्याः विद्वत्तया शास्त्रार्थे पराजितैर्विद्वद्भिः कालिदासेन सहाऽतीव मुक्त्या विद्योत्तमायाः विवाहः कारितः। परन्तु यदा विद्योत्तमा पण्डितानां शाठ्यमवगतवती तदाऽतीव दुःखिता सती सा तम् मूर्खं गृहाद् बहिर्निष्कासितवती। स्वपत्न्याः व्यवहारेणाऽतीव दुःखितः सः मूर्खः निकटस्थ काली मन्दिरे गत्वा भगवतीं कालीमुपासयामास। भगवत्याः कालीदेव्याः प्रसादेन स निखिलशास्त्रनिष्णातः कवित्वपूर्णविद्यापारङ्गतो भूत्वा पुनः स्वपत्न्याः भवनं जगाम। द्वारकपाटमेव रुद्धमासीत्, अतस्तेनोक्तम् - 'अनावृत कपाटं द्वारं देहि'। राजकुमारी विद्योत्तमा आश्चर्यचकिता सती पृष्टवती - 'अस्ति कश्चिद् वाग्विशेषः ?' सः (कालिदासः) स्वपत्न्याः प्रश्नात्मक वाक्यस्य त्रीणि पदानि गृहीत्वा त्रीणि काव्यानि निर्ममे। 'अस्ति' इति क्रिया पदं गृहीत्वा तेन 'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नागाधिराजः' इत्यादि प्रारम्भचरणात्मकं 'कुमारसम्भवं' नाम महाकाव्यम्; 'कश्चित्' इति पदं गृहीत्वा तेन 'कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः' इति प्रारम्भिकचरणात्मकं 'मेघदूतं' नाम खण्डकाव्यम्; 'वाग्' इति पदं च गृहीत्वा 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये' इति प्रारम्भिकचरणात्मकं 'रघुवंशं' नाम महाकाव्यम्प्रणीतम्। अतएव प्रतीयते यद् राजपुत्र्याः विद्योत्तमायाः पूर्वोल्लिखितः मूर्खपतिरेव -

P.T.O

शास्त्री- I खण्ड साहित्य
प्रतिपत्रा - अभिज्ञानशाकुन्तलम्

प्र०- पारिभाषिक प्रश्नोत्तरी ।

(1)- नान्दी → नाटक के आरम्भ में जिस पद्य के द्वारा देवता राजा आदि का अभिनन्दन किया जाय, उसे नान्दी कहते हैं।
नन्द्यन्ते = स्तूयन्ते देवतादयो यस्यामिति नान्दी।

आशीर्वचन संयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देवद्विज नृपादीनां तस्मान्नान्दीति संज्ञिता ॥

अर्थात् ग्रन्थ की निर्विघ्न समाप्ति के लिए आशीर्वादात्मक वाक्यों से युक्त नाटक के आरम्भ में की गई देवता, ब्राह्मण, नृप आदि की माङ्गलिक प्रार्थना को नान्दी कहा जाता है। इस नान्दी के लिए अपेक्षित है कि इसके द्वारा शङ्ख, चन्द्र, पद्म, चक्रवाक, कैरव आदि मङ्गलास्पद वस्तुओं की अभिव्यञ्जना हो जाय। नान्दी चतुःपदा, अष्टपदा तथा द्वादशपदा भी होती है। जैसे —

माङ्गल्यशङ्खचन्द्राब्ज कोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥

भरतमुनि ने अपने नाट्यशास्त्र में कहा है कि —

देवद्विजनृपादीनामाशीर्वादपरायणा ।
नन्दन्ति देवता यस्मात्तस्मान्नान्दीति संज्ञिता ॥

काव्यप्रदीप में लिखा है कि -

नन्दन्ति काव्यानि कवीन्द्रवर्गाः कुशीलवाः पारिषदश्च सन्तः ।
यस्मादलं सज्जन सिन्धुहंसी तस्मादियं सा कथितेव नान्दी ॥

Renu Devi
26/04/21

राध्या-उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

उपशास्त्री - Iखण्ड साहित्यम् तृतीय पत्रम्

रघुवंश महाकाव्यम्

द्वितीयः सर्गः

प्र०(1)- स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजा दिलीपः वनगमनस्य वर्णनं करोति। —

राजा दिलीपः वने सञ्चरन् लतासन्न गृहेषु वनाधिष्ठातृदेवताभिः गीयमानां निजां कीर्तिमाकर्णितवान्। तत्र पुनः सच्छिद्रैः वर्णैः वायुपूरणेन स्वनद्भिः वंशवाद्यस्य कार्यं स्वदानरूपं समाचरितमिति॥

व्याख्याः — सः = राजा दिलीपः, मारुतपूर्णरन्ध्रैः = वायुपूर्णच्छिद्रैः, अतएव कूजद्भिः = स्वनद्भिः, कीचकैः = वेणुविशेषैः, आपादित वंशकृत्यं = सम्पादितमुरलीवाद्यकार्यं यथा स्यात्तथा, कुञ्जेषु = लतागृहेषु, वनदेवताभिः = काननदेवीभिः, उच्चैः = तारस्वरम्, उद्गीयमानं = प्रस्तूयमानम्, स्वं = आत्मीयम्, यशः = कीर्तिम्, शुश्राव = श्रुतवान्।

Renu Devi
26/04/21

राधाउमाकान्त सं० महावि० सुरवसेना, पूर्णिया।